पंचायतन माहात्म्यम् - गणेश माहात्म्यम्

# பஞ்சாயதன மாஹாத்ம்யம் - க³ணேஶ மாஹாத்ம்யம்

निर्विघ्नार्थं हरीशाद्या देवा अपि भजन्ति यम् |
मर्त्यैः स वक्रतुण्डोऽर्च्य इति गाणेशसंमतम् || 1

जगत्सृष्ट्यादि हेतुः सा वरा श्रुत्युक्तदेवता |
गणानां त्वेति मंत्रेण स्तुता गृत्समदर्षिणा || 2

इत्युक्तं तत्पुराणेऽतो गणेशो ब्रह्मणस्पतिः |
महाकविर्ज्येष्ठराजः श्रूयते मंत्रकृच्च सः || 3

मंत्रं वदत्युक्थमेष प्रनूनं ब्रह्मणस्पतिः |
यस्मिन्निन्द्रादयः सर्वे देवा ओकांसि चक्रिरे || 4

स प्रभुः सर्वतः पाता यो रेवान्यो अमीवहा |
अतोऽर्च्योऽसौ यश्चतुरो वसुवित्पुष्टिवर्धनः || 5

वक्रतुंडोऽपि सुमुखः साधोगन्तापि चोर्ध्वगः |
येऽमुं नार्चन्ति ते विघ्नैः पराभूता भवन्ति हि || 6

ये दूर्वांकुरलाजाद्यैः पूजयन्ति शिवात्मजम् |
ऐहिकामुष्मिकान्भोगान्भुक्त्वा मुक्तिं व्रजन्ति ते || 7

॥ इति श्री. प. प. श्रीवासुदेवानन्दसरस्वतीविरचितं पंचायतन माहात्म्यम् - गणेश माहात्म्यम् ॥

நிர்விக்⁴னார்த²ம், ஹரீஶாத்³யா, தே³வா அபி ப⁴ஜந்தி யம் |
மர்த்யை: ஸ வக்ரதுண்டோ³,(அ)ர்ச்ய இதி கா³ணேஶ,ஸம்மதம் || 1

ஜக³த்,ஸ்ருஷ்ட்யாதி³,ஹேது: ஸா வரா ஶ்ருத்யுக்த,தே³வதா |
க³ணானாம், த்வேதி மந்த்ரேண ஸ்துதா க்³ருத்ஸம,த³ர்ஷிணா || 2

இத்யுக்தம், தத்புராணே,(அ)தோ க³ணேஶோ ப்³ரஹ்மணஸ்பதி:|
மஹாகவிர்,ஜ்யேஷ்ட²ராஜ: ஶ்ரூயதே மந்த்ரக்ரு’ச்ச ஸ: || 3

மந்த்ரம் வத³த்யுக்த,²மேஷ ப்ரனூனம் ப்³ரஹ்மணஸ்பதி: |
யஸ்மின்,னிந்த்³ராத³ய: ஸர்வே தே³வா ஓகாம்ஸி சக்ரிரே | | 4

ஸ ப்ரபு⁴: ஸர்வத: பாதா யோ ரேவான்யோ அமீவஹா |
அதோ,(அ)ர்²ச்யோ,(அ)ஸௌ யஶ்,சதுரோ வஸுவித்,புஷ்டிவர்த⁴ன:|| 5

வக்ரதுண்டோ³(அ)பி ஸுமுக²: ஸாதோ⁴க³ந்தாபி சோர்த்⁴வக³: |

யே(அ)மும் நார்சந்தி தே விக்⁴னை: பராபூ⁴தா ப⁴வந்தி ஹி || 6

யே தூ³ர்வா,ங்குர,லாஜாத்³யை: பூஜயந்தி ஶிவாத்மஜம் |
ஐஹிகா,முஷ்மிகான்,போ⁴கா³ன்,பு⁴க்த்வா முக்திம் வ்ரஜந்தி தே || 7

|| இதி ஶ்ரீ. ப. ப. ஶ்ரீவாஸுதே³வானந்த³ஸரஸ்வதீவிரசிதம் பஞ்சாயதன மாஹாத்ம்யம் - க³ணேஶ மாஹாத்ம்யம் ||